Ex/Sans/UG/5.1/39/2018

# BACHELOR OF ARTS EXAMINATION, 2018

(3rd Year 5th Semester)

## SANSKRIT (Honours)

## Course : XI

## [Smṛti Literature]

Time : Two Hours | Full Marks : 30

*The figures in the margin indicate full marks.*

१. अधोलिखितानां प्रश्नानामुत्तरं **सुरगिरा** विधेयम् — 1×5=5

(क) ऋणादान-नामके विवादपदे मिथ्याभियोगिन: को दण्ड: याज्ञवल्क्येन विहित: ?

(ख) कथं राजा नावमन्तव्य: ?

(ग) किम् उत्तरपादे उत्तरदानाय कालो देय: ?

(घ) कानि तावत् कष्टतमानि क्रोधजव्यसनानि ?

(ङ) "प्रमाणं लिखितं भुक्ति: साक्षिणश्च...." इति वचने साक्षिण: इत्यत्र बहुवचनप्रयोगे का युक्ति: ?

२.(क) कस्माद् हेतो: द्यूतात् पानम्, अर्थदूषणात् वाक्पारुष्यं च गुरुतरम् इति कुल्लूकभट्टानुसारं वि व्रियताम्। 3+2=5

(ख) कथं व्यसनं मृत्योरपि कष्टतरं ज्ञायते इति टीकानुसारं स्पष्टीक्रियताम्।

३.(क) कस्मिन् देशे राजा आवासं कुर्यात् ? 1+1+2+1=5

(ख) कथं राजा दुर्गनिर्माणाय उप दिश्यते ?

[*Turn over*]

(ग) कानि तावत् गिरिदुर्गस्य वैशिष्ट्यानि? (टीकानुसारं विलिख्यताम)

(घ) दुर्गे केषां वस्तूनां संग्रहार्थं राजा यत्नवान् भवेत्?

४.(क) याज्ञ्यवल्क्यमतेन किं लेख्यं सर्वदैव साक्षिमत् स्यात्?

1½+1½+2=5

(ख) लेख्यपत्रे केषां नामानि स्युरिति शास्त्रकारोक्तदिशा क्रमानुसारम् उल्लिख्यन्ताम्।

(ग) अपराणि कानि तथ्यानि तत्र अन्तर्भवितव्यानि?

५.(क) किं नाम आगमः? 1+1+1+2=5

(ख) कथम् आगमः भोगाद् बलीयान्?

(ग) कीदृशगुणविशिष्टस्य भोगस्य प्रामाण्यं स्वीकृतम्?

(घ) किम् अभियुक्तस्य सुतः आगमम् उद्धरेत्?

६(क) ''अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्'' — इति याज्ञवल्क्यवचनस्य अर्थः परिष्क्रियताम्। 1+2+1+1=5

(ख) तत्र विज्ञानेश्वरस्य क आशयः?

(ग) कुत्र प्रत्यभियोगः शास्त्रसंमतः?

(घ) तत्र का युक्तिः?

---